# केन्द्रीयसंस्कृतविश्वविद्यालयगङ्गानाथझापरिसरप्रयागराज-भारतीयदार्शनिकानुसन्धानपरिषदोः संयुक्तोपक्रमे समायोज्यमाना

# राष्ट्रियतन्त्रयुक्तिकार्यशाला

**29.08.2023 - 04.09.2023**

***National Workshop on Tantrayukti and their Applications***

ज्ञानं मनुजस्य तृतीयं नेत्रम् इति अभ्युक्तदिशा ज्ञानं नितान्तम् अपरिहार्यम् तद्एतत् ज्ञानं शिक्षया समासाद्यते। शिक्षया ज्ञानं विज्ञानं च प्रसृतं जायते, ज्ञानेन मानवः सुखं शान्तिं समृद्धिं च प्रपद्यते। पुराकाले ज्ञानं विज्ञानं कलां शिल्पं च उत्तरवर्त्तिसन्तत्यै प्रदातुं मौखिकी शिक्षापरम्परा आसीत्। ज्ञानस्य संग्रहणं तदनु विस्तृतिप्रचारप्रसारनिमित्तं ग्रन्थलेखनपरम्परा आरब्धा। ज्ञानं नाम प्रमा, यथार्थबोधः, तद्वति तत्प्रकारकानुभवः। अयं बोधः कमपि विषयमवलम्ब्य भवितुमर्हति। यदि कस्यापि विषयस्य ज्ञानं क्रमबद्धरीत्या समग्रतया तर्कप्रमाणपुरस्सरं बुद्धिगम्यरीत्या प्रस्तूयते तर्हि तच्छास्त्रं भवितुमर्हति। जीवने पुरूषार्थचतुष्टयसम्पादने यत् ज्ञानमुपकरोति तच्छास्त्रं भवति।

**तस्मात् शास्त्रम् प्रमाणं ते कार्याकार्यव्यवस्थितौ।**
**ज्ञात्वा शास्त्रविधानोक्तं कर्मकर्तुमिहार्हसि।।** गी.16.24

इति भगवतः श्रीकृष्णस्य वचनं शास्त्रस्य माहात्म्यम् सूचयति। शास्त्रम् अस्मत्संस्कृतेः जीवातुभूतं वरीवर्त्ति। अतः किन्नु खलु शास्त्रम् इति जिज्ञासायामुच्यते शिष्यते अनेन इति शास्त्रम् । शास्तीति शास्त्रम् अथवा शासनाद्वा शास्त्रम् । शास्त्रं परमतत्त्वप्रतिपादनपरं भवति । पुराकालाद् आरभ्य ज्ञानं विज्ञानं च उत्तरवर्तिसन्तत्यै उपदेष्टुं प्रदातुं च शास्त्राणि प्रणिन्युः आचार्याः। शास्त्राणां रचनापद्धतिः स्वरूपं कथं स्यात् ? शास्त्रसुखबोधो वा कथं भवेत् ? तदर्थं तैः भृशमनुसन्धानं विधाय कतिपयतन्त्रयुक्तयः प्रस्तुताः । तन्त्रयुक्तिः इति पदं पारिभाषिकम् । एतद्द्वयोः पदयोः समासेन सम्भूतं पदम् । तत्र आदौ तावत्तन्त्रमिति पदं तनुविस्तारे

इत्यस्माद्धातो: औणादिके ष्ट्रन्प्रत्यये कृते सति तन्त्रम् इति पदं निष्पद्यते। तन्यते अनेन इति तन्त्रम् अथवा तनोतीति तन्त्रं शास्त्रमित्यर्थः। तन्त्रम् अथवा शास्त्रं नाम सदसद्विवेकं करोति। संदेहपदेषु वस्तुषु प्रमाणमिव राजते। जीवने पुरुषार्थचतुष्टयसम्पादनाय प्रामाणिकं ज्ञानं नियच्छति तच्छास्त्रं भवति। यद्यपि तन्त्रशब्दस्य बहवः अर्थाः सन्ति परं प्रकृतप्रसङ्गे शास्त्रम् इत्यर्थ एव सङ्गच्छते। सुव्यवस्थितः सुनिश्चितः वैज्ञानिकः सिद्धान्तः नियमः, इत्यादिष्वर्थेषु तन्त्रशब्दस्य प्रयोगः वाराहीतन्त्रे दृश्यते। तन्त्रशब्दस्य व्याकरण-सम्मतार्थः विस्तृतिः। आचार्यः शङ्करः शास्त्रशब्दस्य कृते तन्त्रपदं प्राह तथा च साङ्ख्यकारिकाकार: ईश्वरकृष्णोऽपि साङ्ख्यशास्त्रं षष्टितन्त्रमाह, अत एव उच्यते तनोति विपुलानर्थान् तत्त्वमन्त्रसमन्वितान्। तन्त्रं नाम क्रमबद्ध सुव्यवस्थितं परिपूर्णविषयप्रतिपादनपरं ज्ञानम् इति फलितम्।

अथ का नु खलु युक्ति: ? युक्ति: युज्यन्ते सङ्कल्प्यन्ते सम्बध्यन्ते परस्परमर्थाः सम्यक्तया प्राकरणिके ऽभिमतेऽर्थे विरोधव्याघातादिदोषमपास्यानया इति युक्ति:- युक्तिर्नाम उपाय:, हेतु:, कारणम्, क्रमबद्धता, रचना, न्यासः, समुचितादयः, बहवः अर्थाः सन्ति। चरकस्तु युक्तिलक्षणमेवमाह-

**बुद्धिःपश्यति यान् भावान् बहुकारणयोगजान्।**

**युक्तिस्त्रिकाला सा ज्ञेया त्रिवर्गः साध्यते यया॥** च. सू. 11.25

यया धर्मः अर्थः कामः इति त्रिवर्गः साध्यते अथवा विज्ञातेऽर्थे कारणोपपत्तिदर्शनाद् अविज्ञातेऽपि तदवधारणं युक्तिः। युक्तिर्नाम ज्ञातार्थे कारणसङ्गतिं वीक्ष्य अविदितार्थे तत्समाधानविनिश्चयः युक्तिः। तन्त्रस्य युक्तयस्तन्त्रयुक्तयः। अथवा शास्त्रावगमनोपायाः, शास्त्ररचनोपायाः वा।

**तन्त्रयुक्तयः-** चरकसंहिता, सुश्रुतसंहिता, विष्णुधर्मोत्तरपुराणम्, अष्टाङ्गहृदयम्, अर्थशास्त्रम् इत्यादिषु ग्रन्थेषु तन्त्रयुक्तीनां वर्णनमुपलभ्यते परमस्य सर्वाधिकोपयोगः न्यायशास्त्रस्य भाष्ये दृश्यते। तन्त्रयुक्तिर्नाम शास्त्रबोधाय उपायो यः शास्त्रस्य रचनाप्रसङ्गे व्याख्यानप्रसङ्गे अत्यन्तमुपकरोति। निम्नलिखितश्लोकः तन्त्रयुक्तेः ज्ञानस्य महत्त्वं प्रतिपादयति, तद्यथा

**तन्त्रयुक्तेर्महत्त्वम्-**

**अधीयानोऽपि तन्त्राणि तन्त्रयुक्त्यविचक्षण:।**

**नाधिगच्छति तन्त्रार्थमर्थं भाग्यक्षये यथा॥**च.सू.12.48

यथा भाग्यक्षये सति जनः धनं प्राप्तुमप्रभुः असमर्थ: भवति तद्वत् यदि कश्चित् शास्त्राण्यधीयानः तन्त्रयुक्तीः न जानाति चेत् अथवा तन्त्रयुक्तिः प्रयोक्तुं न प्रभवति तर्हि स तन्त्रार्थं ज्ञातुं न प्रभवति।)

चरकाचार्योऽपि तन्त्रयुक्ते: महत्त्वम् एवमेव प्राह

**यथाऽम्बुजवनस्यार्कः प्रदीपो वेश्मनो यथा**

**प्रबोधस्य प्रकाशार्थं तथा तन्त्रस्य युक्तयः॥** च.सू.12.46

**एकस्मिन्नपि यस्येह शास्त्रे लब्धास्पदा मतिः ।**

**स शास्त्रमन्यदप्याशु युक्तिज्ञत्वात् प्रबुध्यते ।।** च.सू.12.47

अर्थः यथा पङ्कजकदम्बोन्मीलननिमित्तं सूर्यो भवति यथा च प्रदीपः गृहं प्रकाशयति तथा तन्त्रयुक्तयः शास्त्रस्य अर्थान् प्रकाशयन्ति । यस्य मतिः एकस्मिन्नपि शास्त्रे तन्त्रयुक्तिभिः क्रमते, स अपरमपि शास्त्रं लीलया द्रुतमधिगच्छति । युक्तिज्ञत्वं तत्र हेतुः ।

प्रयोजनमनुद्दिश्य न मन्दोऽपि प्रवर्तते इत्युक्तदिशा तन्त्रयुक्तीनां किं प्रयोजनम्? इति जिज्ञासायां सुश्रुताचार्यः तन्त्रयुक्तीनां प्रयोजनं द्वयमाह-

**वाक्ययोजनम्-** असम्बद्धवाक्यस्य सङ्गतीकरणम् यथा योग:, उद्देश्य:, निर्देश:, ।

**अर्थयोजनम्-** अर्थयोजनं नाम अप्रकटितस्य अन्तर्लीनार्थस्य, प्रकाशनम् अर्थयोजनम्, यथा अधिकरणम्, पदार्थः, ऊह्यः' इत्यादि । शास्त्ररचनाप्रसङ्गे, शास्त्रतत्त्वोन्मीलनप्रसङ्गे, शास्त्रावगमनसन्दर्भे तन्त्रयुक्तयः मूलाधारत्वेन स्थीयन्ते ।

शास्त्राणां रचनापद्धतिः स्वरूपं कथं स्यात्? शास्त्ररचनायै काचित् व्यवस्था, केचन नियमाः, उपायाः, परिकल्पिताः आचार्यैः। शास्त्रबोधः सुकरतया भवेद् एतदर्थं कतिपयाः उपायाः निर्दिष्टाः ते उपायाः तन्त्रयुक्तिनाम्ना अभिधीयन्ते व्यवह्रियन्ते।

भारतीयवाङ्मये ईसापूर्वकालादेव (700 ईसापूर्वं) तन्त्रयुक्तीः अभिलक्ष्य अतीव-सूक्ष्मरीत्या विस्तरेण विचार: दृश्यते। चरकसंहितायां, सुश्रुतसंहितायां, अर्थशास्त्रे च तन्त्रयुक्तिनामोल्लेख: समालोक्यते, स्वतन्त्ररूपेणापि आचार्यै: अस्मिन् विषये ग्रन्था: लिखिता:। सभायां विरूद्धविषययो: निर्णयावसरे तन्त्रयुक्ते: प्रयोग: भवति।

एवंभूतानां तन्त्रयुक्तीनां चारु ज्ञानमन्तरेण शास्त्रतत्त्वावबोधः यथायथं भवितुं नार्हति। अतः संस्कृतच्छात्राणां संस्कृतविदुषां च कृते तन्त्रयुक्तीनां सम्यक् परिज्ञानं स्यात् इति धिया केन्द्रीयसंस्कृतविश्वविद्यालयस्य गङ्गानाथझापरिसरस्य भारतीयदार्शनिक-अनुसन्धानपरिषदश्च संयुक्तोपक्रमे दिनाङ्क **29.08.2023 - 04.09.2023** पर्यन्तं साप्ताहिकी राष्ट्रिया तन्त्रयुक्तिकार्यशाला आयोज्यते। इयं कार्यशाला आवासीया भविष्यति। कार्यशालायां तन्त्रयुक्तीनां लब्धप्रतिष्ठिता विद्वांसः मार्गदर्शनं करिष्यन्ति। कार्यशालायां तन्त्रयुक्तीविषये व्याख्यानम् संवादः, शास्त्रानुप्रयोगः (आयुर्वेदे) शास्त्रानन्तरप्रयोगश्च (व्याकरणे, न्यायशास्त्रे, शिक्षाशास्त्रे च) भविष्यति। प्रतिभागिनां संख्यापि निश्चिता विद्यते। आभारतं शिक्षासंस्थासु अधीयानानां शोधच्छात्राणाम् अपि च शोधकर्मसु संलग्नानां शोधमार्गदर्शकाणां कृते अयं स्वर्णावसरो विद्यते।

## तन्त्रयुक्तिकार्यशालायां बोधनीयाः प्रमुखाः विषयाः ।

1. पारम्परिकप्राचीनानुसन्धानपद्धतीनां स्वरूपबोध: तन्त्रयुक्तीनां सन्दर्भे।
2. आयुर्वेदग्रन्थानां चरकसुश्रुतादीनां तत्त्वावगमे व्याख्याने च तन्त्रयुक्तीनां योगदानम् ।
3. शास्त्रान्तरेषु परिगणितानां विकीर्णानां च तन्त्रयुक्तीनां विस्तरश: परिज्ञानम् ।
4. शास्त्राणां स्फुटतत्त्वबोधनाय, अवगमनाय, व्याख्यानाय च तन्त्रयुक्तीनामुपयोगिता ।
5. आयुर्वेदेतरशास्त्रेषु तन्त्रयुक्तीनां विनियोग: ।
6. तन्त्रयुक्ती: समाश्रित्य शास्त्ररचना, शास्त्रव्याख्यानम्, शास्त्रावगमनम् ।
7. तन्त्रगुणानां (सच्छास्त्ररचनम् / सच्छास्त्रगुणा:), तन्त्रदोषाणां (दोषेण शास्त्रप्रणयनम्) च परिचय:।
8. प्राचीनार्वाचीनशास्त्रेषु तन्त्रगुणानां तन्त्रदोषाणां च विमर्श:।

## आमन्त्रिताः विद्वांसः

1. प्रो. दिलीपः गाडगिलः, निवृत्ताचार्यः तिलक-आयुर्वेदमहाविद्यालयः, पुणे
2. प्रो. जे. एस. आर. प्रसादः, आचार्यः संस्कृताध्ययनकेन्द्रं हैदराबादकेन्द्रीयविश्वविद्यालयः
3. प्रो. जयरामन्, आचार्यः स्वामिविवेकानन्दयोग-अनुसन्धानसंस्था, बैंगलूरू
4. प्रो. माधवः विजयः आष्टीकरः, सहाचार्यः, दत्तामेघे-आयुर्वेदमहाविद्यालयः, नागपुरः
5. डॉ. गिरीन्द्रसिंहः तोमरः, पूर्वप्रधानाचार्यः, हण्डियाराजकीयआयुर्वेदमहाविद्यालयः, प्रयागराजः
6. प्रो. विजयपालशास्त्री, आचार्यः, के.सं.वि. रघुनाथकीर्तिपरिसरः, देवप्रयागः
7. वैद्य: श्रीप्रसाद: डी. बावाडेकर:, आयुर्वेदाचार्य:, अनुसन्धानविभागाध्यक्ष:, ज्ञानप्रबोधिनी, पुणे

**पञ्जीकरणस्य अन्तिमतिथिः** **20.08.2023**(5:00 PM)

**कार्यशालावधिः -** **29.08.2023 - 04.09.2023**

**आवेदनलिंक -** **https://forms.gle/ZUAmt4ncwc818Dxk7**

## कार्यशालायां भागग्रहणाय निर्देशाः -

1. पञ्जीकरणं निर्दिष्टतिथिपर्यन्तं विधेयम्।
2. कार्यशाला आफलाईनमाध्यमेन भविष्यति।
3. कार्यशालायाम् आचार्या:, सहाचार्या:, सहायकाचार्या:, शोधच्छात्राश्च भागं ग्रहीतुमर्हन्ति।
4. कार्यशालायां भागग्रहणार्थं आवेदनीयम्। आवेदनानां परिशीलनात्परं चिताः अभ्यर्थिनः कार्यशालायां भागग्रहणाय ई-मेलमाध्यमेन सूच्यन्ते।
5. चितानाम् अभ्यर्थिनां पञ्जीकरणं अनिवार्यम् ।
6. कार्यशालायां प्रतिभागिभ्यः आवासव्यवस्था भोजनव्यवस्था च क्रियते।
7. कार्यशालायां प्रतिभागिभ्यः A.C III Tier मार्गव्ययः दास्यते।
8. प्रतिभागिनां उपस्थिति 95% अनिवार्या, उपस्थित्याधारेण प्रमाणपत्रं दास्यते।
9. कार्यशालायां प्रदत्तकार्यं अनिवार्यतया संपादनीयम्।

**संरक्षक:**

## प्रो. श्रीनिवासवरखेडी

कुलपति:, केन्द्रीयसंस्कृतविश्वविद्यालय:,
जनकपुरी, नवदेहली

**संयोजक:**

## प्रो. ललितकुमारत्रिपाठी

निदेशक:, गङ्गानाथझापरिसर:,
प्रयागराज: (उ.प्र.)

## प्रो. सच्चिदानन्दमिश्र:

सदस्य-सचिव:, भारतीयदार्शनिकानुसन्धानपरिषद्,
नवदेहली

**सह संयोजक:**

## प्रो. देवदत्तसरोदे

-

संयोजक:, शोधविकासप्रकोष्ठ:

**संयोजनसमिति:**

डॉ. मनीषजुगरान:

डॉ. मोनालीदास डॉ. यशवन्तकुमारत्रिवेदी

डॉ. धीरजकमारमिश्र: डॉ. रूपलालशर्मा

**प्राविधिकसमिति:**

श्री अनुरागसाहू

श्री अभय:अग्रहरि:

सम्पर्कसूत्रम् –
डा. यशवन्तकुमारत्रिवेदी – 7752847621